श्री दुर्गा स्तोत्रं (महादेव कृतं)

श्री दुर्गा स्तोत्रं (महादेव कृतं)

महादेव उवाच |
रक्ष रक्ष महादेवि दुर्गे दुर्गतिनाशिनि |
मां भक्तमनुरक्तं च शत्रुग्रस्तं कृपामयि || 1 ||

विष्णुमाये महाभागे नारायणि सनातनि |
ब्रह्मस्वरूपे परमे नित्यानंदस्वरूपिणी || 2 ||

त्वं च ब्रह्मादिदेवानामंबिके जगदंबिके |
त्वं साकारे च गुणतो निराकारे च निर्गुणात् || 3 ||

मायया पुरुषस्त्वं च मायया प्रकृतिः स्वयं |
तयोः परं ब्रह्म परं त्वं बिभर्षि सनातनि || 4 ||

वेदानां जननी त्वं च सावित्री च परात्परा |
वैकुंठे च महालक्ष्मीः सर्वसंपत्स्वरूपिणी || 5 ||

मर्त्यलक्ष्मीश्च क्षीरोदे कामिनी शेषशायिनः |
स्वर्गेषु स्वर्गलक्ष्मीस्त्वं राजलक्ष्मीश्च भूतले || 6 ||

नागादिलक्ष्मीः पाताले गृहेषु गृहदेवता |
सर्वसस्यस्वरूपा त्वं सर्वैश्वर्यविधायिनी || 7 ||

रागाधिष्ठातृदेवी त्वं ब्रह्मणश्च सरस्वती |
प्राणानामधिदेवी त्वं कृष्णस्य परमात्मनः || 8 ||

गोलोके च स्वयं राधा श्रीकृष्णस्यैव वक्षसि |
गोलोकाधिष्ठिता देवी वृंदा वृंदावने वने || 9 ||

श्रीरासमंडले रम्या वृंदावनविनोदिनी |
शतशृंगाधिदेवी त्वं नाम्ना चित्रावलीति च || 10 ||

दक्षकन्या कुत्रकल्पे कुत्रकल्पे च शैलजा |
देवमाताऽदितिस्त्वं च सर्वाधारा वसुंधरा || 11 ||

त्वमेव गंगा तुलसी त्वं च स्वाहा स्वधा सती |
त्वदंशांशांशकलया सर्वदेवादियोषितः || 12 ||

स्त्रीरूपं चापि पुरुषं देवि त्वं च नपुंसकं |
वृक्षाणां वृक्षरूपा त्वं सृष्टा चांकुररूपिणी || 13 ||

वह्नौ च दाहिका शक्तिर्जले शैत्यस्वरूपिणी |
सूर्ये तेजःस्वरूपा च प्रभारूपा च संततं || 14 ||

गंधरूपा च भूमौ च आकाशे शब्दरूपिणी |
शोभास्वरूपा चंद्रे च पद्मसंघे च निश्चितं || 15 ||

सृष्टौ सृष्टिस्वरूपा च पालने परिपालिका |
महामारी च संहारे जले च जलरूपिणी || 16 ||

क्षुत् त्वं दया त्वं निद्रा त्वं तृष्णा त्वं बुद्धिरूपिणी |
तुष्टिस्त्वं चापि पुष्टिस्त्वं श्रद्धास्त्वं च क्षमा स्वयं || 17 ||

शांतिस्त्वं च स्वयं भ्रांतिः कांतिस्त्वं कीर्तिरेव च |
लज्जा त्वं च तथा माया भुक्तिमुक्तिस्वरूपिणी || 18 ||

सर्वशक्तिस्वरूपा त्वं सर्वसंपत्प्रदायिनी |
वेदेऽनिर्वचनीया त्वं त्वां न जानाति कश्चन || 19 ||

सहस्रवक्त्रस्त्वां स्तोतुं न शक्तः सुरेश्वरि |
वेदा न शक्ताः को विद्वान् न च शक्ता सरस्वती || 20 ||

स्वयं विधाता शक्तो न न च विष्णुः सनातनः |
किं स्तौमि पंचवक्त्रैस्तु रणत्रस्तो महेश्वरि |
कृपां कुरु महामाये मम शत्रुक्षयं कुरु || 21 ||

इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे नारदनारायणसंवादे अष्टाशीतितमोऽध्याये महादेव कृत श्री दुर्गा स्तोत्रं |